# Vaidyanatha Shiva Stuti by Ashvinaubhilladika

# અશ્વિનૌભિલ્લાદિકૃતા વૈદ્યનાથશિવસ્તુતિઃ

## Document Information

Text title : Vaidyanatha Shiva Stuti by Ashvinaubhilladika

File name : vaidyanAthashivastutiHashvinaubhillAdikakRRitA.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhargAkhyaH panchamAMshaH | adhyAyaH 20||

Latest update : June 18, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 18, 2023

*sanskritdocuments.org*

# અશ્વિનૌભિલ્લાદિકકૃતા વૈદ્યનાથશિવસ્તુતિઃ

અશ્વિનૌ -

ભિષગ્વરં દેવવરં મહેશં ગઙ્ગાધરં સોમહુતાશનેત્રમ્ ।
સુપદ્મમિત્રાન્તરવર્તિનં ત્વાં ભજાવ શમ્ભું સુહિરણ્યબાહુમ્ ॥ ૩૯॥

દશશતવદનેક્ષણોરુપાદૈઃ દશશતનયનેન સંસ્તુતાઙ્ઘ્રિમ્ ।
દશશતરુદ્રગણાભિપૂજ્યલિઙ્ગં દશશતકિરણાક્ષિભાનતૌ સ્વઃ ॥ ૪૦॥

ભિલ્લઃ -

અહો મહાદેવ સદાશિવેશ પ્રસીદ મય્યદ્ય મહાઘપુઞ્જે ।
ત્વત્પાદભક્ત્યા ગણયામિ નામરાન્દ્વિજા મનુષ્યાશ્ચ કિયન્મહેશ્વર ॥ ૪૭॥

કિયન્તિ પાપાનિ કૃતાનિ ચેત્કિમુ ઉત્પાટયે યુર્ભવતોદ્ય શિષ્યમ્ । (ઉત્પાટયેયુશ્ચ મદીયશષ્પમ્)
યદિ સ્મરારેશ્ચરણારવિન્દં સ્મરામિ તસ્માન્ન ભયં મમાદ્ય ॥ ૪૮॥

મુનયઃ -

ત્વામાલોક્ય સુનિર્વૃતા મુનિગણાઃ પ્રાપ્તાભયાઃ શઙ્કરં
વિશ્વેશં મદનાન્તકં સુરવરૈર્વેદૈશ્ચતુર્ભિઃ સ્તુતમ્ ।
ધાત્રા વૃત્રહણેન મારજનકેનારાધિતસ્ત્વં સદા
વિશ્વં ત્વં તમસાં પરઃ શ્રુતિશિરોવેદ્યસ્ત્વમાદ્યો ભિષક્ ॥ ૬૪॥

યા ચોમા ભગવંસ્ત્વદઙ્કવસતિર્યસ્યાઃ કૃપાલેશતો
જાતં વિશ્વમિદં વિચિત્રજનકં યા સા સ્વયં મોહયેત્ ।
યાં દેવા મુનયોઽપ્યમી સ્તુતિશતૈઃ સ્તુત્વા તદીયં શુભં
વિજ્ઞાનં સમવાપ્ય મુક્તકરણા મુક્તિં પ્રયાન્ત્યેવ તે ॥ ૬૫॥

ભિલ્લાદસ્માચ્છિવો યત્કરધૃતધનુષો ભીતિરસ્માકમુગ્રા -
દુગ્રસ્ત્વં શૈવવર્યે વિતતયશઃસીમ્નિ વિસ્તીર્ણધામ્નિ ।
સુધાધામા મૂર્ધા ત્વયિ ચ તદુભયં ભિલ્લગણ્ડૂષવારિ
નો સહ્યં નો મહેશ ભવદભયકૃપાપાત્રભૂતાન્ (?) પ્રસીદ ॥ ૬૬॥

શૈવાઃ -

તારાનાથસહોદરાપતિકૃતાપારાબ્જપૂજાઙ્ઘ્રિકં
મારારાતિમપારદુઃખશમનં ઘોરાદિપાપાપહમ્ ।
ધીરોદારકુમારશૂરજનકં કર્પૂરગૌરં હરં વારં
વારમનુસ્મરામ હૃદયે વીરં કૃપાસાગરમ્ ॥ ૯૮॥

ભિલ્લગણઃ (ભિલ્લઃ) -

નિધનપતિમનીશં શાસિતારં પરેશં
ગુરુમમરવરાણાં ચારણાનાં ચ શમ્ભુમ્ ।
ભુવનજનકમારાદ્વેદશીર્ષેષુ ગમ્યં
કનકગિરિનિવાસં વૈદ્યમાદ્યં નતોઽસ્મિ ॥ ૧૦૨॥

અભેદ્યસ્ત્વચ્છેદ્યો નિખિલભવરોગાદિહરણો
મહાનાદ્યો વૈદ્યસ્ત્વમસિ વિબુધાદ્યાદ્ય વચસામ્ ।
નમોઽન્તાદ્યૈર્મન્ત્રૈઃ પ્રકટિતયજુર્વેદતિલકૈઃ
ભવાંસ્તવ્યઃ સેવ્યો હર હરસિ પાપં મમ વિભો ॥ ૧૦૩॥

—

ઈશ્વરઃ -

ઇતિ સ્તુત્વા તદા ભિલ્લઃ સ્વભિલ્લૈર્ભાર્યયા તદા ।
ગણાધીશોઽભવદ્દેવિ વિકુણ્ઠોપરિ કલ્પિતે ॥ ૧૦૪॥

વિષ્ણુભોગશતાધિક્યે લોકે વૈ સ્થાપિતો મયા ।
એતત્તેઽભિહિતં ગૌરિ વૈદ્યનાથસ્ય વૈભવમ્ ॥ ૧૦૫॥

યઃ શ્રૃણોતિ સદા ભક્ત્યા મયિ ભક્તિં લભેત્ સ વૈ ।
લિઙ્ગમેતત્સકૃદ્દૃષ્ટ્વા સ્નાપ્ય ગઙ્ગામ્ભસા નરઃ ॥ ૧૦૬॥

કૃતકૃત્યો ભવેદ્ગૌરિ સ સાક્ષાદ્ગણપો ભવેત્ ।
વૈદ્યનાથમહાલિઙ્ગં સકૃદ્દૃષ્ટ્વા વિમુચ્યતે ॥ ૧૦૭॥

અનન્તૈરૈપિ પાપૌઘૈઃ સદ્ય એવ ન સંશયઃ ।
શૈવાશ્ચ સતતં ભક્ત્યા બિલ્વૈર્ગઙ્ગામ્ભસા શિવે ॥ ૧૦૮॥

તલ્લિઙ્ગં પૂજયન્ત્યેવ ભવબન્ધવિમુક્તયે ।
લિઙ્ગં મઙ્ગલદં મનોજ્ઞમમલં શ્રીવૈદ્યનાથાભિધં
દૃષ્ટ્વા સમ્પૂજ્ય બિલ્વૈઃ સકૃદપિ ચ નરઃ પ્રાપ્નુયાન્મુક્તિકાન્તામ્ ।

ત્યક્ત્વા પાપૌઘતાપં જનિમૃતિગદજાપારદુઃખૈર્વિહીનો
હીનોઽપિ સ્યાદવશ્યં ભવશતજનિતં ભૂરિપુણ્યં લભેત ॥ ૧૦૯॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે અશ્વિનૌભિલ્લાદિકૃતા વૈદ્યનાથશિવસ્તુતિશ્લોકાનિ સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભર્ગાખ્યઃ પઞ્ચમાંશઃ । અધ્યાયઃ ૨૦॥

- .. shrIshivarahasyam . bhargAkhyaH panchamAMshaH . adhyAyaH 20..

Notes:
Ashwini Kumara twins, Bhilla et al, eulogize Vaidyanatha Shiva. Bhilla is accorded the status of Shiva Gana.

The shloka numbers are maintained per the source text.

Proofread by Ruma Dewan

*Vaidyanatha Shiva Stuti by Ashvinaubhilladika*
pdf was typeset on June 18, 2023

Please send corrections to *sanskrit@cheerful.com*